# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा, नवम्बर्-दिसम्बर्-२०१६

| | | |
|---|---|---|
| कक्षा- शास्त्री-१ (SEM-1) | प्रश्नपत्र-७ | गुणाः - ७० |
| विषयः- साहित्यम् | CE-111 | समयः - ०३ तः ०६ |
| दिनाङ्कः - १२/१२/२०१६ | सन्दर्भग्रन्थः - साहित्यदर्पणः ( प्रथमद्वितीयपरिच्छेदौ ) | |

॥ प्रथमान्वितिः ॥

**प्र-१ द्वयोः सन्दर्भपूर्वकं व्याख्यां कुर्वन्तु ।** **०८**

१. चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि ।
काव्यादेव यतस्तेन तत्स्वरूपं निरूप्यते ॥

२. श्रुतिदुष्टादयो दोषाः अनित्या ये च दर्शिताः ।
ध्वन्यात्मन्येव श्रृङ्गारे ते हेया इत्युदाहृताः ॥

३. उत्कर्षहेतवः प्रोक्ता गुणालङ्काररीतयः ॥

**प्र-२ एकस्य विवरणात्मकोत्तरं लेख्यम् ।** **०८**

१. दर्पणकारस्य देश-काल-कृतिपरिचयो देयः ।

२. ग्रन्थोक्तदिशा मम्मटमतं दूषयत ।

**प्र-३ द्वयोः टिप्पणीं लिखत ।** **०४**

१. काव्यप्रयोजनम् ।

२. वक्रोक्तेः अलङ्काररूपत्वात् खण्डनम् ।

३. ध्वनिकारमतम् ।

४. वाक्यं रसात्मकं काव्यम् ।

**प्र-४ पञ्चप्रश्नानां लघुत्तराणि लिखत ।** **०५**

१. साहित्यदर्पणः कस्मिन् विभक्तः?

२. विश्वनाथस्य वसतिः कुत्र?

३. भोजराजोक्तं काव्यलक्षणं किम्?

४. मम्मटोक्तं काव्यलक्षणं लिखत ।

५. न्यक्कारो ह्ययमेव - पद्येऽस्मिन् कः दोषः?

६. साहित्यदर्पणे प्रथमपरिच्छेदस्य नाम किम्?

७. वक्रोक्तिकारः कः?

॥ द्वितीयान्वितिः ॥

**प्र-५ द्वयोः ससन्दर्भं व्याख्यां कुर्वन्तु ।** **०८**

१. वर्णाः पदं प्रयोगार्हानन्वितैकार्थबोधकाः ।

२. तत्र सङ्केतितार्थस्य बोधनादग्रिमाभिधा ।
सङ्केतो गृह्यते जातौ गुणद्रव्यक्रियासु च ॥

३. मुख्यार्थबाधे तद्युक्तो ययान्योऽर्थः प्रतीयते ।

रूढेः प्रयोजनाद्वाऽसौ लक्षणा शक्तिरर्पिता ॥

**प्र-६ एक एव समाधेयः ।** **०८**

१. दर्पणोक्तदिशा वाक्यलक्षणं विवृणुत ।

२. भेदपुरस्सरं लक्षणां व्याख्यायत ।

**प्र-७ टिप्पणीं लिखन्तु ।( एका )** **०२**

३. अर्थत्रैविध्यम् ।

४. गङ्गायां घोषः ।

**प्र-८ निम्नेषु द्वयोः लघूत्तरं लिखत ।** **०२**

१. कलिङ्गः साहसिकः कस्योदाहरणमिदम्?

२. सङ्केतस्थानानि कानि?

३. व्यञ्जनया शक्त्या कः अर्थः प्राप्यते?

४. महावाक्यस्वरूपं लिखत ।

**॥ तृतीयान्वितिः ॥**

**प्र-९ द्वयोः व्याख्यां कुर्वन्तु ।** **०८**

१. अर्पणं स्वस्य वाक्यार्थे परस्यान्वयसिद्धये ।

उपलक्षणहेतुत्वादेषा लक्षणलक्षणा ॥

२. अभिधालक्षणामूला शब्दस्य व्यञ्जना द्विधा ।

३. शब्दबोध्यो व्यनक्त्यर्थः शब्दोऽप्यर्थान्तराश्रयः ।

एकस्य व्यञ्जकत्वे यत् अन्यस्य सहकारिता ॥

**प्र-१० एकस्य विस्तृतोत्तरं यच्छत ।** **०८**

१. भेदोपभेदपुरस्सरं व्यञ्जनां व्याख्यायत ।

२. आरोपाध्यवसानभेदयुक्तां, रूढिं, प्रयोजनवतीं लक्षणां प्रतिपादयत ।

**प्र-११ टिप्पणीं लिखत ।( द्वयोः )** **०४**

१. आर्थी व्यञ्जना ।

२. कुन्ताः प्रविशन्ति ।

३. कलिङ्गः साहसिकः ।

४. वाक्यद्वैविध्यम् ।

**प्र-१२ पञ्चानांतिलघूत्तरं लिखत ।** **०५**

१. लक्षणायाः कति भेदाः?

२. साध्यवसाना रूढि - उपादानलक्षणायाः उदाहरणं लिखत ।

३. सारोपा - उपादानलक्षणायां रूढौ उदाहरणं किम्?

४. भीमार्जुनौ - कस्योदाहरणम्?

५. अभिधानियामकतत्वेषु देशस्योदाहरणं किम्?

६. व्यञ्जनाशक्तेः द्वौ भेदौ कौ?